देवकी उवाच :

रूपं यत्तत् प्राहुरव्यक्तमाद्यं
ब्रह्म ज्योतिर्निर्गुणं निर्विकारं ।
सत्तामात्रं निर्विशेषं निरीहं
स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥

नष्टे लोके द्विपरार्धावसाने
महाभूतेष्वाधिभूतं गतेषु ।
व्यक्ते व्यक्तं कालवेगेन याते
भवानेकः शिष्यते शेषसंज्ञः॥

यो यं कालस्तस्य तेव्यक्तबंधो
चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरांतो महीयान्
तम् त्वेशानं क्षेमधाम प्रपद्ये ॥

स त्वं घोरादुग्रसेनात्मजान्नः
त्राहि त्रस्तान् भृत्यवित्त्रा सहासि ।
रूपं चेदं पौरषं ध्यान धिष्ण्यं
मां प्रत्यक्षं मांसदृशां  कृषीष्ठाः ॥

जन्म ते मय्यसौ पापो मा विद्यान् मधुसूदन ।
समुद्विजे  भवद्धेतोः कंसादहमधीरधीः ॥

उपसंहार विश्वात्मन् अदोरूपमलौकिकम् ।
शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥

विश्वं यदेतत् स्वतनौ निशांते
यथावकाशं पुरुषः परो भवान् ।
बिभर्ति सोयं मम गर्भ गोभूत्
अहो नृलोकस्य विडंबनं हि तत् ॥

इति श्रीमद्भागवत संहितायाम् तृतीय सर्गे देवकी स्तोत्रम्.